ॐ हरिः ॐ

**श्री गुरुभ्यो नमः**

हरिः ॐ

| | |
|---|---|
| **श्री सियावर रामचन्द्र की** | **जय** |
| **पवन सुत हनुमान की** | **जय** |
| **श्री कृष्ण कन्हैया लाल की** | **जय** |
| **महागणेश महाराज की** | **जय** |
| **उमापति महादेव की** | **जय** |
| **श्री सद्गुरुनाथ महाराज की** | **जय** |

ॐ देवदेवोत्तम देवता सार्वभौम अखिलाण्डकोटि ब्रह्माण्डनायक श्री महागणपति स्वामि सहित श्री परमेश्वर एवं श्री बालकृष्ण स्वामि सहित श्री सीतालक्ष्मण हनुमत्समेत श्री रामचन्द्रस्वामिने नमः मन्त्रपुष्पाणि समर्पयामि ।

ॐ योऽपां पुष्पं वेद । **पुष्पवान् प्रजावान् पशुमान् भवति ।**
चन्द्रमा वा अपां पुष्पम् । **पुष्पवान् प्रजावान् पशुमान् भवति ।**
य एवं वेद । **योऽपामायतनं वेद ।**
आयतनवान् भवति ।

**हरिः ॐ**

Saaket Copy

**स्वस्ति प्रजाभ्यः परिपालयन्ताम्। न्याय्येन मार्गेण महीं महीशाः। गोब्राह्मणेभ्यः शुभमस्तु नित्यम्। लोकाः समस्ताः सुखिनो भवन्तु। काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी देशोऽयं क्षोभरहितः ब्राह्मणाः सन्तु निर्भयाः।**

**ॐ शान्तिः शान्तिः शान्तिः॥**

ॐ महद्भ्यो नमः। स्वामिनः। भवन्तः सर्वे शृण्वन्तु। स्वस्ति मन्त्रार्थाः सत्याः सफलाः सन्तु इति महान्तोऽनुगृण्हन्तु। **तथास्तु।**

अस्य देवदेवस्य देवता सार्वभौमस्य अखिलाण्डकोटि ब्रह्माण्डनायकस्य सकलनिष्कलस्वरूपस्य सर्वज्ञत्व - सर्वेश्वरत्व - सर्वान्तर्यामित्व - सर्वसृष्टित्व - सर्वभोक्तृत्व - सर्वसंहारकत्व - सर्वव्यापकत्व - सर्वशक्तिमत्वादिगुणगणविभूषितस्य - वेदान्त वेद्यस्य - लोकानुग्रहकारकस्य - भक्तानुग्रहवरदस्य भगवतः श्री महागणपति स्वामि सहित श्री परमेश्वर एवं श्री बालकृष्ण स्वामि सहित श्री सीतालक्ष्मण हनुमत्समेत श्री रामचन्द्रस्वामिनः नित्यपूजा - अभिषेक अलन्कार नैवेद्य दीपाराधनकर्माणि मध्ये यत्किञ्चित मन्त्रलोपे तन्त्रलोपे क्रियालोपे शक्तिलोपे श्रद्धालोपे काललोपे नियमलोपे नैवेद्यादिविहितलोपे च सत्यं सर्वं यथाप्रोक्तं यथाशात्रानुष्ठितं भगवत्प्रीतिकरं भूयादिति महान्तोऽनुगृण्हन्तु। **तथास्तु।**

Saaket Copy

सर्वे जनाः सुखिनो भवन्तु । तथास्तु ।

सर्वं समस्तं सन्मङ्गलानि सन्तु । तथास्तु ।

अयं धर्मः उत्तरोत्तराभिवृद्धिरस्तु । तथास्तु ।

राजा धार्मिको विजयी भवतु । तथास्तु ।

देशोऽयं निरुपद्रवोऽस्तु । तथास्तु ।

सत्या एता आशिषस्सन्तु । तथास्तु ।

ॐ दाशरथाय विद्महे सीता वल्लभाय धीमहि । **तन्नो रामः प्रचोदयात् ।**

ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । **तन्नो सीताः प्रचोदयात् ।**

ॐ तत्पुरुषाय विद्महे आदिशेषाय धीमहि । **तन्नो लक्ष्मणः प्रचोदयात् ।**

ॐ आन्जनेयाय विद्महे महाबलाय धीमहि । **तन्नो हनुमत् प्रचोदयात् ।**

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । **तन्नो रुद्रः प्रचोदयात् ।**

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । **तन्नो दन्तिः प्रचोदयात् ।**

श्री सियावर रामचन्द्र की **जय**

पवन सुत हनुमान की **जय**

श्री कृष्ण कन्हैया लाल की **जय**

महागणेश महाराज की **जय**

उमापति महादेव की **जय**

श्री सद्गुरुनाथ महाराज की **जय**

Saaket Copy

ॐ राजाधिराजाय प्रसह्यसाहिने। नमो वयं वैश्रवणाय कुर्महे। स मे कामान्कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु। कुबेराय वैश्रवणाय महाराजाय नमः॥

ॐ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं गुहायाम् विभ्राजते यद् यतयो विशन्ति॥ वेदान्त-विज्ञान सुनिश्चितार्थाः सन्यास योगाद्यतयश्शुद्धसत्त्वाः। ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे॥ दह्रं विपापं परमेश्म भूतम् यत्पुण्डरीकं पुरमध्य सग्गस्थम्। तत्रापि दह्रं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्॥ यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परः स महेश्वरः॥

न तत्र सूर्यो भाति न चन्द्र तारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥

| | |
|---|---|
| श्री सियावर रामचन्द्र की | जय |
| पवन सुत हनुमान की | जय |
| श्री कृष्ण कन्हैया लाल की | जय |
| महागणेश महाराज की | जय |
| उमापति महादेव की | जय |
| श्री सद्गुरुनाथ महाराज की | जय |

Saaket Copy